# Vedavyasaproktam Hayagriva Stotram

# વેદવ્યાસપ્રોક્તં હયગ્રીવસ્તોત્રમ્

## Document Information

Text title : Vedavyasaproktam Hayagriva Stotram

File name : vedavyAsaproktaMhayagrIvastotram.itx

Category : vishhnu, vishnu, mahAbhArata, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | shAntiparva | adhyAya 327/89-96||

Latest update : November 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 15, 2025

*sanskritdocuments.org*

# વેદવ્યાસપ્રોક્તં હયગ્રીવસ્તોત્રમ્

સ આદિઃ સ મધ્યઃ સ ચાન્તઃ પ્રજાનાં સ ધાતા સ ધેયઃ સ કર્તા સ કાર્યમ્ ।
યુગાન્તે સ સુપ્તઃ સુસઙ્ક્ષિપ્ય લોકાન્યુગાદૌ પ્રબુદ્ધો જગદ્ધ્યુત્સસર્જ ॥ ૮૯॥

તસ્મૈ નમધ્વં દેવાય નિર્ગુણાય ગુણાત્મને ।
અજાય વિશ્વરૂપાય ધામ્ને સર્વદિવૌકસામ્ ॥ ૯૦॥

મહાભૂતાધિપતયે રુદ્રાણાં પતયે તથા ।
આદિત્યપતયે ચૈવ વસૂનાં પતયે તથા ॥ ૯૧॥

અશ્વિભ્યાં પતયે ચૈવ મરુતાં પતયે તથા ।
વેદયજ્ઞાધિપતયે વેદાઙ્ગપતયેઽપિ ચ ॥ ૯૨॥

સમુદ્રવાસિને નિત્યં હરયે મુઞ્જકેશિને ।
શાન્તયે સર્વભૂતાનાં મોક્ષધર્માનુભાષિણે ॥ ૯૩॥

તપસાં તેજસાં ચૈવ પતયે યશસોઽપિ ચ ।
વાચશ્ચ પતયે નિત્યં સરિતાં પતયે તથા ॥ ૯૪॥

કપર્દિને વરાહાય એકશ‍ૃઙ્ગાય ધીમતે ।
વિવસ્વતેઽશ્વશિરસે ચતુર્મૂર્તિધૃતે સદા ॥ ૯૫॥

ગુહ્યાય જ્ઞાનદૃશ્યાય અક્ષરાય ક્ષરાય ચ ।
એષ દેવઃ સઞ્ચરતિ સર્વત્રગતિરવ્યયઃ ॥ ૯૬॥

ઇતિ મહાભારતે શાન્તિપર્વણિ ૩૨૭ અધ્યાયાન્તર્ગતં
વેદવ્યાસપ્રોક્તં હયગ્રીવસ્તોત્રં સમ્પૂર્ણમ્ ।

મહાભારત । શાન્તિપર્વ । અધ્યાય ૩૨૭/૮૯-૯૬॥

mahAbhArata . shAntiparva . adhyAya 327/89-96..

Proofread by PSA Easwaran

*Vedavyasaproktam Hayagriva Stotram*

pdf was typeset on November 15, 2025

Please send corrections to *sanskrit@cheerful.com*